## स्वामी विवेकानन्दः

महापुरुषेषु स्वामी विवेकानन्दः अन्यतमः। सः न केवलं भारतीयानाम् अपि तु विश्वेषां सर्वेषां वन्दनीयः। अयं महापुरुषः त्रिषष्ट्युत्तराष्टादशशततमेशवीयाब्दस्य जानुयारीमासस्य द्वादशतमे दिनाङ्के दक्षिणकलिकातायां सीमलापल्ल्यां जन्म प्रप्तवान्। तस्य पितुः नाम विश्वनाथदत्तः, मातुर्नाम भुवनेश्वरी देवी। तस्य बाल्यनाम नरेन्द्रनाथदत्तः इति आसीत्। सः बाल्यादेव अत्यन्तमेधावी श्रद्धावान् दयालुः च आसीत्। बाल्यकालात् अन्यया क्रीडया समं ध्यानमपि करोति स्म। अयं श्रुतिधरः बाल्ये एव स्तोत्रादिकम् एकवारं श्रुत्वा कण्ठस्थं कृतवान्। सप्तमे वयसि मेट्रपलिटन्विद्यालयद्वारेण तस्य पाठारम्भः अभवत्।ततः प्रेसिडेन्सिमहाविद्यालये वत्सरद्वयं यावत् स्कटिस्चार्चमहाविद्यालये च वत्सरत्रयं यावत् पठितवान्। पठनेन समं गीतवाद्यादिषु, शरीरचर्यायाम्, अश्वारोहणे, असिसञ्चालने च दक्षः आसीत्। पितुः मरणादनन्तरं तस्य संसारे वैराग्यं जातम्। ततः दक्षिणेश्वरे रामकृष्णपरमहंसेन सह तस्य साक्षात्कारः अभवत्। परमहंससकाशात् सन्न्यासं स्वीकृत्य तस्य स्वामी विवेकानन्द इति नाम अभवत्। ततः अमेरिकामहादेशे शिकागोधर्ममहासभायां भारतीयप्रतिनिधिरूपेण भाषणं प्रदाय भारतमुन्नतासने अस्थापयत्। ततः भारतं प्रत्यावर्य बेलुरमठं प्रतिष्ठापितवान्। अयं महापुरुषः द्व्यधिकोनविंशतितमेशवीयाब्दस्य जुलाईमासस्य चतुर्थे दिनाङ्के ऊनचत्वारिंशत्तमे वयसि ध्यानेन नश्वरशरीरं त्यक्तवान् इति शम्

--------------------

## श्रीशङ्कराचार्यः

जगद्गुरुषु श्रीशङ्कराचार्यः अन्यतमः। अयं जगद्गुरुः दक्षिणभारतस्य केरलप्रदेशस्य कालाडिनामके ग्रामे अष्टवसुसिन्धुमिते(७८८) ईशवीयाब्दे जन्म प्राप्तवान्। तस्य पितुः नाम शिवगुरुः, मातुः नाम विशिष्टा देवी। अयं श्रुतिधरः स्वल्पे एव वयसि सर्वेषु शास्त्रेषु प्राविण्यं प्राप्तवान्। सः पितृभ्यां कथितां पौराणिकीकथाम् एकवारं श्रुत्वा आवृत्तौ आसीत् सक्षमः। यद्यपि तृतीये वयसि तस्य पितृवियोगः अभवत् तथापि मातुः महत्या चेष्टया तस्य अध्ययनं निर्विघ्नं प्रचलति स्म। अष्टमे वयसि सः सन्न्यासं स्वीकृतवान्। तस्य गुरोः नाम आसीत् गोविन्दपादाचार्यः। गुरुणा आदिष्टः सः

अद्वैतदर्शनप्रचाराय दिक्षु निर्गतः। वदरिकाश्रमं प्राप्य सः ब्रह्मसूत्रभाष्यं तथा गीतादिभाष्यं रचितवान्। व्यासदेवः भाष्यं पठित्वा तृप्तिं प्राप्य तस्य आयुः द्वात्रिंशद्वर्षं यावत् वर्धयितवान्। ततः वेदान्ततत्त्वं प्रचारयन् सः बौद्धमतं खण्डितवान् अद्वैतत्त्वं च प्रतिष्ठापितवान्। अयं जगद्गुरुः अद्वैततत्त्वप्रचाराय भारतस्य चतुर्षु दिक्षु चतुर्मठान् स्थापितवान्। अस्य चत्वारः शिष्याः आसन्। तेपि स्वगुरुमनुसृतवन्तः। अयं जगद्गुरुः योगबलेन स्वशरीरं त्यक्तवान् इति शम्।

-----------------------------

## अस्माकं शिक्षाप्रतिष्ठानम्

अस्माकं शिक्षाप्रतिष्ठानस्य नाम रामकृष्णमिशन् विवेकानन्दविश्वविद्यालयः। इदं प्रतिष्ठानं हाउडामण्डलान्तर्गते बेलुडप्रदेशे अवस्थितम्। चतुरधिकद्विसहस्रतमेशवीयाब्दस्य जुलाईमासस्य चतुर्थतमे दिनाङ्के इदं प्रतिष्ठितम्। स्वामीविवेकानन्दपादानां मानसप्रसूतः अयं विश्वविद्यालयः। अस्मिन् विश्वविद्यालये प्राच्यस्थपारम्परिकविद्यया समं पाश्चात्यशिक्षायाः अपि शिक्षादानं भवति। अस्माकं विश्वविद्यालयस्य पञ्च विभागाः सन्ति। सर्वे विभागीयाः स्वकार्यं यथायथं निष्पादयन्ति। प्रत्यहं दशवादनतः सार्धचतुर्वादनपर्यन्तं वर्गाः भवन्ति। मध्ये अर्धहोरात्मकः विरामः तिष्ठति। तस्मिन् समये सर्वे स्वल्पाहारं स्वीकुर्वन्ति। यद्यपि सर्वे स्वकार्यं यथायथं पालयन्ति तथापि संस्कृतविभागस्य किञ्चित् वैशिष्ट्यं विद्यते। संस्कृतविभागे संस्कृतमयं वातावरणमेव भवति। पठनपाठनक्रिया संस्कृतभाषया एव प्रचलति। सर्वे छात्राः छात्रावासे स्थित्वा संस्कृतभाषया एव वार्तालापं कुर्वन्ति। संस्कृतभाषायाः प्रचाराय रविवासरे होरात्रयात्मकं वर्गमपि चालयन्ति छात्राः यत् स्वस्य स्वविश्वविद्यालयस्य सर्वेषां च उपकाराय भवति इति शम्।

-----------------------------

## अस्माकं देशः

भारतं नाम अस्माकं देशः। उत्तरे हिमालयपर्वतरक्षिता दक्षिणे भारतमहासागरपखिरीकृता इयं भूमिः। आवैदिककालात् अत्र ज्ञानराशेः भाण्डारः अस्ति। परं वैदेशिकाः एनं देशम् आक्रम्य तत्सर्वं नाशितवन्तः अपहृत्य च स्वदेशं नीतवन्तः। आङ्गलशिक्षाप्रभावात् प्राचीनं ज्ञानं म्रियमाणं जातम्। सप्तचत्वारिंशदधिकनवदशशततमेशवीयाब्दस्य अगस्तमासस्य पञ्चदशतमे दिनाङ्के अयं देशः पराधीनमुक्तः अभवत्। ततः अत्र गणतन्त्रः प्रतिष्ठितोऽभवत्। अस्माकं देशे ऊनत्रिंशत्प्रदेशाः सन्ति। प्रदेशेषु पुनः मण्डलानि सन्ति। अत्र जनगणाः एव स्वशासकं चिन्वन्ति। अस्मिन्नेव देशे उपनिषद्वाक्यानि समुद्घोषितानि। अस्माकं देशे एव रामकृष्ण-विवेकानन्द-सुभाषचन्द्रसदृशाः महापुरुषाः जन्म प्राप्तवन्तः। तेषां प्रवर्तितमार्गे वयं स्थित्वा पुनः भारतं स्वगौरवं प्रत्यर्पयिष्याम इति निष्चप्रचम्।

--------------------------------

**अस्माकं ग्रामः**

अस्माकं ग्रामस्य नाम मोहनपुरम्। पश्चिममेदिनीपुरमण्डलान्तर्गतः अयं ग्रामः। अस्माकं ग्रामः नातिवृहत्, जनगणः अपि अधिकः नास्ति। तस्मात् सर्वं सुव्यवस्थितम्। सर्वे जनाः स्वकार्यं निष्ठया सम्पादयन्ति। सस्यक्षेत्राणि यथासमये बहुभिः सस्यैः पुरितानि भवन्ति। तदा ग्रामस्य नैसर्गिकं दृश्यं दर्शनीयं भवति। मार्गे अटनसमये चित्तं प्रफुल्लं भवति। अस्माकं ग्रामे बहुनि शिवमन्दिराणि, एकम् अतिप्राचीनं जगन्नाथमन्दिरम्, एकं मातुः कालीदेव्याः मन्दिरं चास्ति। अत्रत्याः मातुः भक्ताः प्रत्यहं मातरं पूजयन्ति। अस्माकं ग्रामे परिवहनव्यवस्थाऽपि अत्यन्तसुव्यवस्थिता। ग्रामं परिवृत्य स्थितः एकः मार्गः राजमार्गेण सह संयोजितोऽस्ति, येन यानानि सरलतया एव गन्तुं पारयन्ति। अस्माकं ग्रामे एकम् आरक्षककेन्द्रमपि अस्ति। येन दुराचारभयात् वयं रक्षिताः। अस्माकं ग्रामे एकः प्राथमिकविद्यालयः,एकः उच्चविद्यालयः एकः महाविद्यालयश्च अस्ति। अस्मात् ग्रामात् बहवः छात्राः स्वयोग्यतां सम्पाद्य विदेशेषु गतवन्तः, अग्रे च अस्माकं ग्रामस्य गौरवं इतोऽपि प्रकाशयिष्यन्ति इति निश्चप्रचम्। अहं तद्ग्रामस्थः इति आत्मानं धन्यं मन्ये।

--------------------------------

**मम परिचयः**

मम नाम देवदत्त-शर्मा। अहं हाउडामण्डलान्तर्गते बेलुडग्रामे निवसामि। मम पितुः नाम यज्ञदत्त-शर्मा। मम मातुः नाम रुक्मिणी देवी। मम एका दशमवर्षीया भगिनी अस्ति। तस्याः नाम चन्द्रिका। सा अतीव सुशीला। मम पिता कोशागारस्य आधिकारिकरूपेण कार्यं करोति। पादकन्दुक-क्रीडा मह्यम् अतीव रोचते। प्रत्यहम् अपराह्णे क्रीडितुं गच्छामि। देशेषु विदेशेषु अपि भ्रमणे इच्छा अस्ति। अधिकाधिकतया उन्मत्तः समुद्रः माम् आकर्षति। अहम् अष्टादशवर्षीयः, द्वादशकक्षायाः पाठं समाप्य संस्कृतविषयम् विषयीकृत्य स्नातक-प्रथमवर्षे पठामि। मम विद्याप्रतिष्ठानस्य नाम संस्कृत-महाविद्यालयः। संस्कृतपठने मम महती रुचिः वर्तते। परन्तु दौर्भाग्यवशात् संकृतेन वक्तुं न शक्नोमि। तस्मात् रामकृष्णमिशन्-विवेकानन्द-विश्वविद्यालयेन आयोजिते अस्मिन् रविवासरीय-वर्गे

उपस्थितोऽस्मि। अहं संस्कृतभाषायाः यथायथप्रयोगं ज्ञात्वा अस्य माधुर्यं जनेषु प्रचारयिष्यामि इति मम प्रतिज्ञा।